# ॥ श्री वराह स्तोत्र ॥

जितं जितं तेऽजित यज्ञभावना
त्रयीं तनूं स्वां परिधुन्वते नमः ।
यद्रोमगर्तेषु निलिल्युरध्वराः
तस्मै नमः कारणसूकराय ते ॥ १ ॥

रूपं तवैतन्ननु दुष्कृतात्मनां
दुर्दर्शनं देव यदध्वरात्मकं ।
छन्दांसि यस्य त्वचि बर्हिरोम-
स्स्वाज्यं दृशि त्वङ्घ्रिषु चातुर्होत्रम् ॥ २ ॥

स्रुक्तुण्ड आसीत्स्रुव ईश नासयो-
रिडोदरे चमसाः कर्णरन्ध्रे ।
प्राशित्रमास्ये ग्रसने ग्रहास्तु ते
यच्चर्वणन्ते भगवन्नग्निहोत्रम् ॥ ३ ॥

दीक्षानुजन्मोपसदः शिरोधरं
त्वं प्रायणीयो दयनीय दम्ष्ट्रः ।
जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः
सभ्यावसथ्यं चितयोऽसवो हि ते ॥ ४ ॥

सोमस्तु रेतः सवनान्यवस्थितिः
संस्थाविभेदास्तव देव धातवः ।
सत्राणि सर्वाणि शरीरसन्धि-
स्त्वं सर्वयज्ञक्रतुरिष्टिबन्धनः ॥ ५ ॥

नमो नमस्तेऽखिलयन्त्रदेवता
द्रव्याय सर्वक्रतवे क्रियात्मने ।
वैराग्य भक्त्यात्मजयाऽनुभावित
ज्ञानाय विद्यागुरवे नमो नमः ॥ ६ ॥

दम्ष्ट्राग्रकोट्या भगवंस्त्वया धृता
विराजते भूधर भूस्सभूधरा ।
यथा वनान्निस्सरतो दता धृता
मतङ्गजेन्द्रस्य स पत्रपद्मिनी ॥ ७ ॥

त्रयीमयं रूपमिदं च सौकरं
भूमण्डले नाथ तदा धृतेन ते ।
चकास्ति शृङ्गोढघनेन भूयसा
कुलाचलेन्द्रस्य यथैव विभ्रमः ॥ ८ ॥

संस्थापयैनां जगतां सतस्थुषां
लोकाय पत्नीमसि मातरं पिता ।
विधेम चास्यै नमसा सह त्वया
यस्यां स्वतेजोऽग्निमिवारणावधाः ॥ ९ ॥

कः श्रद्धधीतान्यतमस्तव प्रभो
रसां गताया भुव उद्विबर्हणं ।
न विस्मयोऽसौ त्वयि विश्वविस्मये
यो माययेदं ससृजेऽति विस्मयम् ॥ १० ॥

विधुन्वता वेदमयं निजं वपु-
र्जनस्तपः सत्यनिवासिनो वयं ।
सटाशिखोद्धूत शिवाम्बुबिन्दुभि-
र्विमृज्यमाना भृशमीश पाविताः ॥ ११ ॥

स वै बत भ्रष्टमतिस्तवैष ते
यः कर्मणां पारमपारकर्मणः ।
यद्योगमाया गुण योग मोहितं
विश्वं समस्तं भगवन् विधेहि शम् ॥ १२ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे श्री वराह प्रादुर्भावोनाम त्रयोदशोध्यायः ॥